CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आरम्भकाल: १९६३ ई० भारतवर्षस्य सांस्कृतिक-राजधानी काशीत: प्रकाशितम् दूरभाष: ६६४७४

Post without Pre Paymen
Licen ce NO-LIRN1144

गाण्डीवम्

लाइसेन्स नं०-२०

रजि० नं०एल०आर० एन० १४४

प्रा० सं० १७१२
सहायक डीन
वाल्मीकि विद्यापीठ [कैम्पस]
प्रदर्शनी मार्ग
काठमाण्डू नेपाल

२४ अक्टूबर-३० अक्टूबर १९८४

पृष्ठानि १२

...अनन्यतम संस्कृतसाप्ताहिकम्।

टंकार: २१ शर: ४ मङ्गलवार: का० कृ० ३० त: का० शु० ६ पर्यन्तम् सं० २०४१

महाकवि कालिदास जयन्ती

मिथिलाञ्चलस्य मधुवनीमण्डलवर्ति-प्रसिद्धमङुकियाग्रामे श्रीहरिहरनाथमहादेवमन्दिरप्राङ्गणे कविकुलगुरो: कालिदासस्य जयन्ती-उत्सव अक्टूबरमासस्य ४ तारिकायां विजयादशम्यां गुरौ महता समारोहेण संपन्न: । उत्सवेऽस्मिन् अवकाशप्राप्त: साहित्याचार्य: पं० श्रीशोभाकृष्णझामहाशय: सभापतिपदमलङ्कृतवान् । आदौ विशिष्टातिथय: श्रीफुलकुमारझा बहुशास्त्रधुरीणा: ललितललितया सुरगिरा प्राबोचन् यत् कविचक्रचूड़ामणे: कालिदासस्य कैलासगौरं यश: न केवलं भारतभूमेरपि च समस्तजगद्धवलयति । पाश्चात्या: कीथमहाशया: तस्य काव्योत्कर्षं प्रशंसन्तोऽपि तस्य काव्येषु न कोऽपि संदेश उपलभ्यत इति निरूपयन्ति । तत्वविचारितरमणीयमेव । कालिदासकृतिषु तत्र तत्र जीवनप्रकर्षाधायका विचाराश्चाकासन्ति । उपमामिषेणार्थान्तरोपन्यासेनोपक्षिपति । रघुकौत्सयोर्दृष्टान्त एकत्रौदार्य-प्रकर्षमन्यच्च गुरुभक्तिम् अपरिग्रहपरतां च व्यञ्जयति ।

भारते व्यासवाल्मीकिकालिदासा: न केवलं कवय: किन्तु समाजनेतार: भवन्ति । तेषां नेतृत्वं न केवलं तात्कालिकाय समाजोपकारकं किन्तु अनन्तसमयं यावत् प्रजानां बहुमुखायोपकारकाय प्रकल्प्यते । शीलसंवर्धनेन कुटुम्ब-समाज-राष्ट्रप्रेमसमुद्बोधनेन सौन्दर्यस्य, शिवस्य, सत्यस्य च साक्षात्कारप्रकल्पनेनैते जीवनसमृद्धिं नयन्ति ।

कालिदासस्य शब्दसंचयनपाटवं कल्पनाप्रौढिश्च सर्वातिशेते । रघुवंशे गां नन्दतो दिलीपस्य प्रतिग्राहितपुष्पमाल्यांवाश्च सुदक्षिणाया वर्णनं, तथैव वनात्प्रत्यावर्तितयो: गौरीशिवयो: सुदक्षिणाकृता भावपूर्णा सत्कृतिस्तथा हृदयंगमा भवति यथा भावुकस्य चेतसि साक्षादिव स्फुरन्त्यवतिष्ठते "श्रुतेरिवार्थं स्मृतिरन्वगच्छत्" इति ।

उपमया अनया न केवलं प्रसङ्गनिरूपणस्य चमत्कृतिरभिवर्धिता किन्तु पतिपत्नीसंबन्धस्य पवित्रताऽपि प्रतिपादिता । पुन: पुन: परिशीलनेऽपि न तस्य रचना ज्ञाता स्वादा उद्वेजयन्ति इति ।

नूनं कुबेरस्योत्तराधिकारित्वं प्राप्ता वयं भाग्यवन्त: स्म: इति वेणीपट्टीस्थित उच्चपीठस्य परंपराश्रवणेन ज्ञायते यत् कवेर्जन्मभूमिस्तत्रैवासीत् । शाकुन्तलनाटकस्य चतुर्थाङ्कस्य आदौ व: कुसुमप्रसूतिसमय--अस्याभिप्रायेणायं मैथिलश्चासीत् तथा कुमारसंभवमेघदूतस्योद्धरणेनापि विश्वासो भवति यदयं मैथिल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणपरम्परया चायं कविः मिथिला प्रान्तीयो मैथिलश्चासीत्। नात्र विचिकित्सा केषाञ्चिन्मनांसि उद्वेजयतीतिशम्। ततः कवितापाठः, संगीतं, संस्कृते हिन्द्यां च कविवरेण्यस्य व्याख्यान्यनेकान्येवमादिक्रियाजातमुपाकल्पयत। यत्रैते भागिनोऽभवन्।

पं० श्रीसत्यदेवझा–आशीषकुमारझा-ताराचरणझा, विजयकुमारझा, कोरनझा, कुशेश्वरझा, काशीकान्तझा, उदितनारायणझा तथा रमानन्दझा महोदयानामपि भाषणं चमत्कारपूर्णं जातम्, अध्यक्षीयभाषणानन्तरं सभा कार्यादिकं समाप्तं जातम्। रात्रौ ग्रामीणच्छात्रवर्गैः शाकुन्तलनाटकस्याभिनयोऽपि जातः।

स्वतन्त्रतायाः समयेऽपि चाद्य,
देशे विदेशे स्वगृहे बहिर्वा।
यशो मनोहारि समादरेण,
श्रीकालिदासस्य विराजतेऽलम्॥१॥

काव्यान्यनेकानि मनोहराणि,
सालंकृतान्युत्तमतां गतानि।
श्री कालिदासेन विनिर्मितानि,
पुष्णन्त्यभिख्यां खलु कालिदासः॥२।

कालीचरणझा, शास्त्री, मडुकिया, मधुबनीस्थः।

ध्यानाकर्षणम्

वयं कुलपतेः कुलसचिवादीनां च अधिकारिवर्गाणामत्र ध्यानाकर्षणं कर्तुमिच्छामो यत् सम्पूर्णानन्द–संस्कृत–विश्व–विद्यालयस्य अन्ताराष्ट्रियच्छात्रावासस्य इतोऽप्यधिकं वर्द्धनस्यावश्यकताऽति। तत्कथमिति चेदत्र प्रतिवर्षं संस्कृताध्ययनहेतोर्देशविदेशेभ्यः समागन्तुकानां छात्राणां संख्या वर्द्धमानाऽस्ति, तथा छात्रावासमधिष्ठाय अध्ययनार्थं प्रकोष्ठानामल्पायस्त्वेन सर्वेषां छात्राणां कृते छात्रावासः सुलभो नाऽस्ति। महता कष्टेन बहिः स्थित्वा विश्वविद्यालयेऽध्येतुमागमनं प्रयत्नसाध्यं भवति। अतो हेतोश्छात्राणां तेषां पुरः समुपस्थितायां विषमपरिस्थितौ विश्व-विद्यालयप्रशासनमधिकारिवर्गञ्च वयं सादरमनुरुन्ध्मो यत् तेषां छात्राणां निवासस्थितिरत्र संजायताम्। तदर्थमन्ताराष्ट्रियच्छात्रावासस्य उपरिभागे नवीनानि कोष्ठकानि निर्माय सर्वेषां वैदेशिकच्छात्राणां ये खलु ऐषमो (१९८४–८५) वर्षसत्रस्य कृते प्रविष्टाः सन्ति तेषां कृतेऽवश्यमेवच्छात्रावासः सुलभः करणीयोऽस्तीति।

आवेदकः–
सुशीलकुमारपोखरेलः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयीयश्छात्रः।

ईश्वरेण सह सततं वार्तालाप एव ईश्वर-साक्षात्कारः

विगतदिने श्रीअग्रसेनस्नातकोत्तरमहाविद्यालयस्य सभागारे महर्षेररविन्दस्य जीवनदर्शनमुद्भावयन् गौहाटीविश्वविद्यालयस्य पूर्वप्राध्यापकेन प्रो० महादेवस्वामिना कथितं यत् ईश्वरेण सह सततं वार्तालाप एव ईश्वर-साक्षात्कारः। इश्वरो न कश्चिदन्य अपितु मानव एव ईश्वररूपः। यः सततं सद्व्यवहारेण व्यवहरति मानवैः सह स एव ईश्वरेण साक्षात्करोति। तेन कथितं यद् महर्षिणा चत्वारिंशद्वर्षपर्यन्तं शून्यावासं स्वीकृत्य साधना विहितासीत्। साधनयानया अरविन्देन महर्षिणानुभूतं मल्लौकिकेन सदाचरणेनैव पारमार्थिको व्यवहारः सिध्यति।

कार्यक्रमोऽयं समायोजयन् संस्कृतविभागाध्यक्षेण डॉ० गदाधरत्रिपाठिना दर्शनशब्दस्य व्याख्यानं कुर्वता इदमपि व्याहृतं यत् सामयिके सन्दर्भे तद् दर्शनमेव संगतं यत सामयिकां अपेक्षां परिपूरयति। समकालिका या विसङ्गतयः सन्ति, ता उपेक्ष्य न कापि दर्शनदृष्टिः स्थापयितुं शक्यते। महर्षेररविन्दस्य जीवनं तस्य दर्शनं च सामयिकीम् अपेक्षां परिपूरयितुं शक्यते।

समारोहस्यान्ते प्राचार्येण श्री श्यामबिहारीश्रीवास्तवमहोदयेन धन्यवादः ज्ञापितः। सायंकाले तस्मिन्नेव दिने प्राचार्यस्य आवासेऽपि एका पृथक् गोष्ठी समपद्यत यस्यां श्रीमहादेवस्वामिना महर्षेररविन्ददृष्ट्या योगस्य व्यावहारिकीं विधिं व्याख्यातम्।

ममतात्रिपाठी, मऊरानीपुरे, झाँसीस्था।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादक-मण्डलम्

ब्रजवल्लभद्विवेदः, राधेश्यामधरद्विवेदः,
जानकीप्रसादद्विवेदः, जगन्नाथशास्त्री
तैलङ्गः, राजनाथत्रिपाठी।

गाण्डीवम्

शुल्कम् { वार्षिकम् रू० २५·००
अर्द्धवार्षिकम् रू० १३·००
प्रत्यङ्कम् पै० ·६०

संस्थापकः
स्व० पं० रामबालकशास्त्री

अध्यक्षः
प्रो० करुणापतित्रिपाठी

व्यवस्थापकः—'गाण्डीवम्', सम्पूर्णानन्द–संस्कृत-विश्वविद्यालयः, वाराणसी–२२१००२

रत्नापात्रगतं स्नेहं प्रदीपं श्रीविवर्धनम् । प्रयास्यन्ति विना तेन भस्मत्वं यद्भवद्गुणाः ॥

(सु० र० भा० पृ० २४७ श्लोक–६२)

सम्पादकीयम्–

ध्वान्तापहा दीपमालिका

'तमसो मा ज्योतिर्गमय' इति श्रुत्यनुरोधन समग्रो हि जीवलोकः तमसोऽपनयनं ज्योतिषश्चानयनं वाञ्छति। ब्रह्मणो ज्ञानरूपत्वात्तस्य च प्रकाशरूपत्वात् परमपुरुषार्थत्वेन प्रकाश एवाश्रयणीयो भवति। प्रकाशकामनायैव भारतीया दीपमालिकां सम्मिल्य अनुष्ठीयन्ते । पौराणिकदृष्ट्याऽस्यैव प्रकाशकथायाः सम्बन्ध भारतीयमहापुरुषेषु श्रीरामचन्द्रेण, ज्ञानगुरुषु: शिवेन, सौन्दर्यमाधुर्याद्यधिष्ठातृदेवीषु लक्ष्म्यादिभिः संयुज्यते ।

'दीपक' शब्दस्य कोह्यर्थ इति जिज्ञास्यमाणे सति प्राक्तन-कोशेषु 'यवान्यामपि दीपकः' इत्यमरे, 'दीपकं वागलंकारे वाच्यवद्दीप्तिकारके । दीपकश्चाजमोदायां यवानीबर्हिचूडयोः' इति मेदिनीकोशादौ दीपकशब्दस्य तत्तदर्थाः निरूपिताः। पाणिनीयव्याकरणदृशा हि 'दीपयतीति दीपकः' इत्यर्थे 'दीपि दीप्तौ' (दि० आ० से०) इत्यस्माद्धातोः ण्वुलप्रत्यये कृते सति दीपकशब्दनिष्पत्तिः सङ्गच्छते। दीपयति प्रेरयति पौरुषं, अनामयं, अमृतं, शिवतत्त्वं वेति दीपकः। अत दीपकत्वेन वर्तमानाः तत्तद् देवानां जीवानां वा शक्तयः तत्र तत्र समुल्लसन्तीति जानन्त्येव तत्त्वविदः।

पौराणिकाख्यानानुरोधेन रामरावणयोर्द्वेयु रामविजय प्रयुक्तस्योत्कर्षस्य प्रदर्शनाय दीपमालिकाया आयोजनं क्रियते भारतराष्ट्रे। धान्यलक्ष्मीः क्षेत्रेभ्यो धान्यं संग्राह्य अन्नक्षेत्रेषु गृहेषु च प्रविशति। किञ्च शारदीया अमृतमयी आभा भारते निपतन्ती रुजाद्यपनोदैर्जनान् संतर्पयन्ती लोकेषु प्रविशति। अतस्तदुत्सवे अमावस्यायां तत्स्वागतमिषेण अत्रत्या जना अमन्दमानन्दमनुभवन्तो दीपमालिकोत्सवमायोज्यन्ते। पुराप्येतदायोजनं भवति स्म। यथोक्तमिन्दुमत्या स्वयम्वरमाश्रित्य महाकविना कालिदासेन—

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गादिव प्रपेदे, विवर्णभावं स च भूमिपालः ॥ इति ॥

शारदीयनवरात्रे पुनः को जागरीतिपूर्णिमायां, ततः कार्तिकीयामावस्यायाञ्च पर्णकुटीरादारभ्य भव्यभवनपर्यन्तं यस्या महालक्ष्याः पूजनमस्माभिरायोज्यते तस्योत्पत्तेरनेकान्याख्यानान्यस्माकं ग्रन्थेषु सन्ति उपनिबद्धानि। ऋग्वेदे श्रीसूक्ते च–हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह" इति रूपेण तस्याः नानाविधनामभिः स्तवनं जातम् । वाल्मीकिव्यासानुसारेण हि लक्ष्म्याः प्रादुर्भावो सृष्टेरादावेव सागरे तरङ्गितेन कमलेन समजनीति। अतः सा कमलतनयेत्युच्यते। लोकपालेन कुबेरेणापि लक्ष्म्याः सम्बन्धः। भागवते रुक्मिणी रूपा सा। देवीभागवते सृष्टेरुत्पादिका एव प्रकृतिः दुर्गा–राधा–लक्ष्मीः–सरस्वती-सावित्री रूपिणी सती पञ्चधा सम्बोध्या भवति। पुराणेषु विष्णुप्रियेत्यभिधीयते। जैन–बौद्ध ग्रन्थेषु भारताद् बहिर्देशेष्वपि नेपाल–हिन्देशिया–पूर्वाय यूरोपीयदेशेषु सा भारतीयदृष्टिरिव समादृता भवति। अतः तस्योत्सवं आगमनञ्चास्माकं समेषामभीष्टकोटौ प्रविष्टमस्तीति न केषामप्यत्र विमतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कं वशीकर्तुम् ?

अहो ! पूर्वाऽङ्गना संसज्जितेयं कं वशीकर्तुम् ।
रञ्जयत्योष्ठ शोणिम्ना दिगन्तान् कं निजीकर्तुम् ॥

विशालं लोहितं सिन्दूर-विन्दुं मस्तके कृत्वा,
कर्णयोः कर्णपूराभौ विन्ध्य-शैलेश्वरौ धृत्वा ।
पद्मदन्तैर्दरोन्मोलद्भिरीषद् बिभ्रती हास्यम् ,
चलद्भिर्वल्लरीजालैर्व्यञ्जयन्ती कल लास्यम् ॥

मिलिन्दैर्मञ्जु-गुञ्जद्भिर्वन्दते कं वशीकर्तुम् ।
अहो ! पूर्वाऽङ्गना संसज्जितेयं कं वशीकर्तुम् ॥

मुखाम्भोजे पयोजानां परागौघं विलिम्पन्ती,
तडागादर्शबिम्बे निर्मले वक्त्रं नु पश्यन्ती ।

भूतलेऽप्यन्तरिक्षे व्योमभागे चारु नृत्यन्ती,
विनिद्रैः कोरकैर्दन्तच्छटाजालं वितन्वन्ती !!

पक्षिणां कूजनै आमन्त्रयन्ती कं वशीकर्तुम् ?
अहो ! पूर्वाऽङ्गना संसज्जितेयं कं वशीकर्तुम् ??

रमाशङ्करमिश्रः 'मधुपः', प्रतापगढ़स्थः ।

हासकणिका

पृथिवीचन्द्रमसोः सम्बन्धः

भूगोल पाठयन् विप्र शिष्यं पप्रच्छ वै गुरुः ।
सम्बन्धः कः पृथिव्याश्च चन्द्रस्य वर्तते मिथः ॥१॥

भ्रातुः स्वसुश्च सम्बन्धः प्रत्युवाच स तत्क्षणात् ।
कथमित्युक्तवति तस्मिन् व्याचख्यौ स हि बालकः ॥२॥

पृथिवी वर्तते माता चन्द्रमा चापि मातुलः ।
मातृमातुलसम्बन्धः पूर्वोक्तः स्थापितो यतः ॥

सुद्युम्नाचार्यः, बलियास्थः ।

हासकणिका

ईसा मसीहो भवतां गृहे

निरीक्ष्य महिलां वैद्यो ज्ञात्वा गर्भवतीं च ताम् ।
प्राह यत् कृपया शीघ्रं पतिं सूचयतामिति ॥

चिकित्सकवचः श्रुत्वा महिला प्रत्युवाच यत् ।
कथं पतिं सूचयेयं यतो नाऽहं विवाहिता ॥
तस्या उत्तरमाकर्ण्य उक्तवान् स चिकित्सकः ।
अस्तु तर्हि स्वकीयं त्वं प्रेमिणं सूचितं कुरु ॥
प्रेमी चाऽपि न कोऽप्यस्ति ममेत्युक्ते चिकित्सकः ।
उक्तवानथ तां नारीं सरोषं खिन्नमानसः ॥
एवं तर्हि स्वकीयौ त्वं पितरौ सूचयस्व यत् ।
श्रीमान् उत्पत्स्यते ईसा मसीहो भवतां गृहे ॥

प्रशस्यमित्रः शास्त्री, 'छिद्रान्वेषी

भारतीयम्

इयं भारती भूतलं स्वर्णलोकम्,
विधातुं समायाति सत्यं वदामि ।
इयं भारती भारतं भूषयन्ती,
समेषां जनानां समत्वं समीयात् ॥१॥
न यावद् भुवं भारती भूषयिष्यति,
न यावन्नरः भारतीं पूजयिष्यति ।
न कर्मावबोधः न युद्धावरोधः,
न तावत् प्रबुद्धो जनो बोभविष्यति ॥२॥
अरे भारतीयाः प्रतीक्षा त्वलं ते,
भवेत् राष्ट्रभाषा सुधाभारतीयम् ।
पुनः भूतले शिक्षकत्वं भजन्तः,
समेषां ब्रुवन्तुर्धरित्री कुटुम्बः ॥३॥
समाजे जनानां, प्रवृत्तिः सुकार्ये,
भवेदत्र मातः मनीषीजनौघः ।
अये देवि वाचे ययाचे जनोऽयम्,
सुखी स्यात् धरित्री निवासी मनुष्यः ॥४॥

रामसहायमिश्रः, परूइयाआश्रमे, फैजाबादस्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(लघुकथा)

त्रिंशतरूप्यकाणि

शृणु भो ! किं स्वपिसि ?

नहि ! किं कथनीयमास्ते ?

अस्ति किञ्चित्, तर्हि कथय।

कुद्धं न भविष्यसि ?

नहि नहि कथय कथय ॥

परिचिन्तयामि खल्वहं यत् मनोः पाठशायान तावत् परिमोचयेयम्, किन्तु कथमसौ गमिष्यति ?

पादाभ्यां गमिष्यति, पाठशाला खलु नातिदूरं वर्तते। किन्तु नातिपार्श्वमप्यास्ते ततोऽप्यधिकं कम्पिकाभारवेष्टनम्।

एवं तर्हि कम्पिकाभारमहं नयामि।

किं त्वं तं तत्र प्रेषयितुं गमिष्यसि ?

किं भविष्यति, तावत्कालं मेधा त्वत्पार्श्वे स्थास्यति ?

शोभनमिदम् । किन्त्वयं समारम्भः किमर्थः ?

अहं खलु परिचिन्तयामि, प्रतिमासं त्रिंशत्रूप्यकाणि अवशिष्टानि भविष्यन्ति, किन्तु तेन किं करिष्यसि ?

दुग्धं खल्वहमधिकं क्रेष्यामि, यतो हि मेधया पीते दुग्धे उदकशरावमपि न अवशिष्टं भवति।----

कथं शान्तो जातः ? किमपि मया अनुचितं कथितम् ? नहि। मृत्तरयानं तु परिहरणीयमेव।

तर्हि अग्रिममासतो दुग्धं खलु परिवर्धिष्यते ? दुग्धं खलु मम दृष्टौ नैव पातुं लिखितम्।

कथम् ? सा सहसैव सावधाना उत्थिताऽभूत् अग्रिममासतो मम गृहस्वामी भाटकं वर्धिष्यते।

कियत् वर्धिष्यते ?

त्रिंशत्रूप्यकाणि।

कु० अलकासिंहः

पतत्पुष्पम्

(गीतम्)

पतति भुवीदं पुष्पम् !

विना सदिच्छां हित्वा वृन्तं,
शून्यं कृत्वा शाखाम् ।
बन्धुतरोः सम्बन्धमपश्यद्,
विस्मृतबह्वनुरागम् ॥

(भूत्वा) लोचनयोर्नवदृश्यम्। पतति० ॥१॥

मन्दं मन्दं वाति समीरः,
साम्प्रतमपि सानन्दम् ।
तपति रविः कूजन्ति खगाः,
मधुपाः गुञ्जन्ति अमन्दम् ॥
अस्मै किमपि न रम्यम् ! पतति० ॥२॥

शृङ्गारः जगतः कृतोऽस्य वै,
भवता यावज्जीवम् ।
प्राप्तं किन्तु शिरः कस्यापि,
न वा गात्रं कमनीयम् ॥

पुष्प ! जगदिदं दुःखम् ।
सर्वं भोग्यं भोग्यम् ॥

त्रिपाठियमुनेशः 'चातकः', नरवरस्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरभाषया व्यवहारसाधनम् अभ्यासाधीनम्

आचार्य पं० केदारनाथ ओझा, काशीस्थः ।

सञ्चारशून्यसदसे नहि रोधमाना,
क्षेत्रं विशालमधुना द्रुतमीहमाना ।
श्रद्धां श्रमञ्च नियतं समपेक्षमाणा,
संराधनं सुरगवीच्छति भारतीयम् ॥ १ ॥

यत्र सदसि सने सदस्याः संस्कृतगिरो बोद्धारो न समवयन्ति तत्सदसे संस्कृतभाषणं न रोचते इति सर्वत्रानुभूयते, यदि बहवः संस्कृतज्ञा विरलाश्च संस्कृतानभिज्ञा अपि विशिष्टवैदुष्यभाजस्तत्र संस्कृतभाषणं न भूषणं जायते । आमन्त्रिततस्य समुपस्थितस्य च विख्यातविदुषो भाषणं नूतनविषयलाभलोभेन सदस्यानां जिज्ञासया वैदुष्यसम्मानदिशा च अवश्यमपेक्षितं भवति, बहुषु च संस्कृतभाषणेषु एकं द्वे वा हिन्दीभाषणे न तथा शोभेते । संस्कृतसर्वस्वस्य भारतस्य नाद्यापि काचिद् भाषान्तरासंकीर्णा संस्कृतविद्वत्परिषदिति सूचयतश्च । अहो मम भाषणं सर्वं समवगच्छति तस्य गुणदोषौ च विवेचयन्ति, अहन्त्वत्र व्याख्यातापि पण्डितानां भाषणं नावबुध्ये इति चेतसि किमपि चिन्तयति । एवञ्च संस्कृतज्ञभूयिष्ठा बहुगोष्ठ्यो भाषान्तरेण असंकीर्णाः समुदयन्ताम्, तथा बहवः संस्कृतभाषणनिपुणाः सहस्रे एकमपि संस्कृतज्ञमवगत्य संस्कृतभाषणान्न जिह्रियुः, परम् अन्ये व्यवहारानभिज्ञा मामपवदेयुः—

निन्दत्सु यदपि न नान्दा हसतु सपत्नी जनः पतिस्त्यजतु ।
उच्चैरिदं वदामो मम सखि दामोदरः शरणमिति ॥१॥

इति न्यायेन मम संस्कृतं शरणम् इति उच्चैः सिद्धान्तं सूचयेयुस्तदा भाषायाः सञ्चारशून्यतोऽपसरेत्, रोचेत च संस्कृतसदसे भाषा, लभेत च संस्कृतगवी बहुषु सभासु गोचरम् । तादृशञ्च विशालं क्षेत्रं समीहते सुरसरस्वती । सपरिपारस्य मम जीविका संस्कृतसेवया प्रचलति, प्रतिष्ठा सम्मानञ्च सर्वं संस्कृतमूलमेव । सर्वविधाः संस्कृतप्रचारणसंरक्षणरूपाया यथाशक्ति मयाऽवश्यमनुष्ठेया इति यथाकथमपि संस्कृतसेवकानां श्रद्धाऽनिवार्या । तेन च व्यवहरणीयं प्रस्तुतं कार्यं न विहन्यत इति विज्ञाय सर्वत्र व्यवहारक्षेत्रे सरलं संस्कृतमेव वक्तव्यम् इत्यायाति ।

इदम् इत्थम् आपतितम्—भाषया व्यवहारमन्तरा व्यक्तेर्जनस्य व्यवहारस्य भाषायाश्च पाटवं नायाति । नास्ति चाधुना गृहस्य, प्रतिवेशस्य, ग्रामटीकाया, ग्रामस्य, जनपदस्य च व्यवहारभाषा संस्कृतम् । नोपतिष्ठते च व्यवहारव्याघातात् सदस्यानामन्येषाञ्च बलाद् हठाद्वा पण्डितानाम् अवश्यं संस्कृतभाषणम्, किन्तु संस्कृतसेवाश्रद्धाविभूषणस्य व्याख्यातुर्हठ एव समुपस्थापयेत् संस्कृतभाषणम्, तथा व्रतिन एव सुरसरस्वतीसेवकाः साम्प्रतं संस्कृतं व्यवहारसिंहासनेऽभिषेक्तुं सहायकाः सेधिष्यन्ति । चिरादेषा समस्या मम शिरसि समापतत् । ममैक एव सहोदर आसन्नषोडशवर्षेभ्यः कनीयान् निर्धनतया जीविकार्थं दूरे यत्र तत्र व्यवसन्नस्य मम अध्ययनसमये सहवासं नालभत, परमध्ययने पटुस्तेन सर्वविषयविद्यालयेऽधीयानो बाल्यात्संयोजितोऽपि संस्कृतं विहातुमुद्यतः कटुवचनेन पूज्यपितृसमक्षमेव मयाऽनुशासितः तवाध्ययने समर्जितधनस्योपयोगो भवतु, ममार्जितं धनं संस्कृतस्य, तव संस्कृतविषयपरित्यागः संस्कृतस्यानादरः, संस्कृतत्यागेन तवाध्ययनं समुन्नतं न भविष्यति, पालयदस्मदनुशासनम्, संस्कृतेनैव परीक्षायां समाजे च प्रतिष्ठां प्राप्तं परं शासनसेवायां संलग्नः सर्वथा संस्कृतं पर्यहरदिति तु अन्या वार्ता । परिस्थितिरेषा गत (१९४२) द्वाचत्वारिंशेशाब्दसविधवर्तिसमयस्य ।

ततश्च संततयः समुपस्थिताः स्वसमयस्य विद्यालयेषु अधीयाना विद्यालये गृहे च प्रत्यहं संस्कृतम् अवश्यं पठन्तु इत्याग्रह आसीत् । आधारस्तु विद्यालयेषु प्रचलत्संस्कृतपुस्तकमेव । तदाधारेणैव साधारणसंस्कृतवार्तालापे पत्रादिलेखे बालानां संस्कृतभाषणप्रतियोगितादौ प्रवेशने च सामर्थ्यं सम्पाद्य लघुकौमुदीमपाठयम् तेषु एक एवाधुना मया साकं संस्कृतपत्रेण व्यवहरति, अन्य एकः समर्थोऽपि हिन्द्यैव लिखति । एकैव कन्याविद्यालये प्रवेशमन्तरेणैव गृहेऽन्यविषयैः सकं निपुणं संस्कृतम् अध्यापिता चिरं श्वसुरालयात् संस्कृतपत्रेण मम पार्वे व्यवाहरत् । अधुना तु संस्कृतं त्यक्तवती मया साक पत्रव्यवहारमपि पर्यहरत् सर्वं श्रमेण जातमित्येतावतैवास्योल्लेखः । न संस्कृते एव श्रमस्य अपेक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्तु विषयान्तरेऽपि। अहन्तु चिरादवलोकयामि, अन्येषामपि-अपेक्षा चेत् साक्षात् कर्तुं प्रभवन्ति।

द्विविधो हि विद्वान् छात्राणामभिभावको मिलति, तत्रैकः प्रत्यहं विद्यालयीयं गृहस्य च पठनम् अनुसन्धत्ते। किम् पठितं किन्न? किमायाति किन्न? अपेक्षितपूतये प्रयतते च, प्रयासफलञ्च परीक्षते, तस्य बाला विद्यालये अधीयानाः परिपुष्टविषयका अग्रेतनेऽध्ययने उन्नयन्ते। द्वितीयश्च विद्वान् अभिभावको न तथाऽनुसन्धत्ते प्रयतते च, केनापि प्रकारेण त्रुटौ अवगतायामपि अल्पसामयिकं (ट्यूशन) वैतनिक-मध्यापकं नियोजयति, तत्रापि वैतनिकः सामयिकोऽध्यापको महान् वञ्चको मिलति, यदा कदा गृहे आयाति विद्यालये एव एषां बालकानां पाठ्यविषयान् परिपोषयामीति ब्रूते। कक्षापरीक्षायाम् अधिकान् अङ्कान् प्रदाय अभिभावकान् प्रहर्षयति, तादृशस्य बालकाः पाठ्यविषये दुर्बलाः शुश्रूषया उत्कोचेन च कञ्चित् परीक्षां पूरयन्ति। तथा च विषयान्तरेऽपि श्रमस्य अपेक्षा।

अधुना व्यवह्रियमाणाया अपि इङ्लि भाषायास्तथैवदशाः शिक्षाविभागीयकृतकार्यकर्मचारी शिक्षाविभागीयाङ्गलपत्राणां सम्यगभिप्रायमवगन्तुं प्रभवति न, विभागान्तरपत्राणाम् इति न्यायव्याकरणशास्त्रार्थयोरिवावस्था। आधुनिकाः संस्कृतशास्त्राचार्याः साहाया एम० ए० परीक्षां दत्तवन्तः कथमपि एकस्मिन् आंङ्गल-पत्रे समुत्तार्णा इङ्लिसव्यवहारे तथैव। अहन्तु वर्षचतुष्टयाभ्यन्तरे एव इङ्लिसभाषामयं मुद्रितं पी० एच० डी० परीक्षानिबन्धपुस्तक-परीक्षणविवरणपत्रं प्राचीनं हिन्दी एम० ए० परीक्षोत्तीर्णं विंशति वर्षाणि यावद् विश्वविद्यालये अध्यापनसेवां विधाय सेवाविरतं सहायं विश्वस्य हिन्दीभाषया प्रापूरयम्, तत्र च विपरीतं जातम्। तथा च यस्य यस्यां भाषायां श्रम अभ्यासश्च स एव तया भाषया व्यवहारनिपुणः। काश्यामेव दूरादेव संस्कृतसंरक्षणस्य के के कीदृशा उपाया अनुष्ठीयन्ते? कीदृशं फलं प्रदर्श-यन्ति ते उपाया इति संस्कृतसंरक्षणचिन्तया परिभाषयामि। यथा सार्वभौम संस्कृतकार्यालये सोहंवावाश्रीभरतमिश्रप्रयासे च, तत्र वाक्यरचनायाः पदसम्पादनस्य च या शैली पुस्तका रूढा अन्यथा सञ्चाल्यमाना वा सा न किमपि विशेष वैचित्र्य-मावहति, अन्येऽपि जानन्ति तत्रत्य पुस्तकावलोकनेन बहवो ज्ञातुं प्रभविष्यन्ति, किन्तु अध्ययनातिरिक्तसमयेऽपि तत्र गृहे संस्कृतेन व्यवहरणीयं भाषणीयञ्चेत्यनुशासनं तस्यैव फलमवलोक्यतेऽधिकम्। अनुशासनेऽवस्थिता एव बाला अधी-यानाः वा अन्ये छात्राः संस्कृतं शिक्षिष्यन्ति नोपदेशमात्रेणेति चिरा-दनुभवामि, अनुशासनमपि बलप्रयुक्तं स्यात्तदैव फलम्, न वात्स-ल्येन सौहार्देन वा संस्कृतं न वदिष्यसि तदा न पाठयिष्यामि इत्यादि बलमपि साम्प्रतं मम विगतम्, बार्धको दौर्बल्ये सुषुप्तिसुखं विरलम्, मुक्ताबिन्दुविभूषिताभ्यां नयनाभ्यां स्वयं पुस्तकपठनमपि कठिनं कष्टप्रदम्, मनश्च दुर्मद शास्त्रशृंखलासंश्लेषमन्तरा सेवकं विना कथं दिनं रात्रिर्वा गमिष्यति, एतावान् व्ययश्च कुत अयास्यति? गृहस्य परिवारस्य च न समाचारो मिलति इत्यादि नाना चिन्तां क्लेशकरीं समुपस्थापयति, अथान्मम सविधेऽध्येतारोऽपि मम जीवननिर्वाहे सहायकाः कथं तत्र बलस्यावसरः।

संस्कृतविद्वांसोऽपि यदा कदा संस्कृतगिरो विपरीतं समाच-रन्ति। शृणोमि यत् संस्कृतविश्वविद्यालयेऽधुना दशदिनानि हिन्दीभाषया परिभाषेन्दुशेखरस्य व्याख्यानं प्रचलति, ये श्रोतारः परिभाषेन्दुशेखरव्याख्यानोपयोगि संस्कृतं नावबुध्यन्ते ते कया-ऽपि भाषयापरिभाषेन्दुशेखरमपि नावभोत्स्यन्ते इति मम विपरीतो निर्णयः, न बाधिष्यते च तदनुकूलोदाहरणसाक्षात्कारमन्तरेण कस्यचिदुपदेशेन।

अखिलभारतीयसंस्कृतप्रतिष्ठानस्य ऐषमो मुमुक्षुभवनेऽनिवि-शतः कश्चित्कार्यकलापोऽपि अंशेन साक्षात्कृतः। नवरात्रदुर्गापाठ-प्रसङ्गात् समयसंकोचे सत्वपि विपदन्तरेण प्रसितः किञ्चिदेवापरम-लोकयम्। तत्रापि सबलेनैवानुशासनेन फलमित्यन्वभवम्। मम सविधवर्तिनौ संस्कृतमधीयानौ द्वौ बालौ न तत्र सम्मिलितौ मया प्रेरितावपि। आदौच्च तेषां शिक्षणक्रमः समीचीनो नूतनः परिश्रमसाध्योऽपि अवबोधाभ्यासरलः। प्रारम्भिकसंस्कृतशिक्षणे न काममपि लिपिं संस्कृतेतरां भाषां वा सहायम् आश्रितवन्तः। संस्कृतभाषामपि होरायां होराद्वयस्य वा कार्यक्रमे दश पञ्चदश वा पदान्येव पौनः पुन्येन विविधलघुवाक्यसम्पादकानि प्रयुञ्जानाः तदानीमेव अभ्यासाय सम्यक् प्रायतन्त, बहवः शिक्षामभीप्स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वो वाला युवानो वयस्काश्चोपविष्टाः, एक एव शिक्षको रिक्ते चतुर्दिक्षु उपपञ्चदशानि पदानि भ्रमितुमुपयुक्ते परिसरे उत्तिष्ठन्नेव उच्चरितसंस्कृतपदानामर्थावबोधानुकूलं किमपि वस्तु गृह्णन् कदाचन विविधां हस्तचेष्टां प्रदर्शयन् अन्यदा पादविन्यासेन मुखनेत्रविविधाकारेण एकं बालकं कदाऽपि बालिकां समुत्थाप्योपवेशयन् पदानां लिङ्गभेदं बोधयन् पादसञ्चालनेन गमनक्रियां हस्तयोः संयोगविभागाभ्यां कतिपयजनानां सम्मेलनपृथक्करणाभ्यां नाना पदार्थान् सूचयन् प्रशिक्षयत् अति पर्यश्राम्यतश्च शिशोः प्रथमवचसोउन्मेषं संस्कृतपदेनैव सम्पादयितुं शक्तौ उपायश्रमाविति सम्यगसाधयत्, श्रमसाध्यं सर्वमित्यत्र स्फुटदृष्टान्ततामपतच्च ।

एवं शिक्षकस्य चातुर्यश्रमाभ्यां जातेऽपि सुरगिरः शिक्षणे शिक्षणीयानां पात्राणां संस्कृतशिक्षणं प्रति मम हितं हितसाधनं वेति दृढ़ा श्रद्धा मनोऽवधानश्रमश्च सहकारिणौ, तत्तारतम्यात् फलतारतम्यमायास्यत्येव । शिक्षणे एतादृशेऽभ्यासभूयिष्ठे जातेऽपि तदानीन्तनोऽभ्यासः कतिपयमासेभ्यः कल्पेत, अग्रे च गन्तुं पुनरभ्यास आवश्यकः । अभ्यासानां संख्या न नियता, गृहीतवस्तुना तत्कार्यसम्पादनमेवाभ्यासः, अधीतस्य अध्यापनं स्वायत्तभाषया व्यवहार एवाभ्यासः, अभ्यासप्राचुर्यं अभ्यस्तं समुन्नतं स्फीतञ्च जायते विशिष्टताञ्चाजयति । एतदेवाभिप्रत्य शीर्षके व्यवहरणे अभ्यासाधीनम् विशेषणम् । तथा च संस्कृतविदुषां सुरगिरा भाषणेन तेषां श्रोतृणां द्रष्टृणाञ्च संस्कृतभाषणं समुन्नेष्यति । आविष्कृतेषु आविष्क्रियमाणेषु च संस्कृतसम्वर्धनोपायेषु संस्कृतभाषणमुपायो बलीयान् सद्यः फलप्रद इति फलति तथा च संस्कृतज्ञा अधिकं संस्कृतभाषणं समाचरन्तु तेन ऐषाम् इयत्ताञ्च संस्कृतं व्यवहारभाषेति व्यवहारः समुदियात्, नाधुना एतादृशो व्यवहारो भारते, अन्यत्र कुत आशा । जनगणनाप्रभृतिकार्ये तथा गणना प्रचलेत् । विधानसभाप्रभृतिषु प्रदिशन्तो नागरिकप्रतिनिधयः कतिपये सुरभाषाप्रणयिनोऽन्वेषणीयाः, ते च तत्र यदा कदा संस्कृतं चर्चितुं स्तोतुञ्च प्रार्थनीयाः येन क्रमशश्चिरन्तनी भारतस्य सुरसरस्वती व्यवहारभाषेति वादः समुत्तिष्ठेत्, भवतु नाम प्रथमम् अल्पसंख्यकानामेव । एतच्च सुरसरस्वत्या व्यवहारमञ्चेऽभिषेचनं संस्कृतज्ञानामसाधारणं कार्यम् । तत्र च संस्कृतभाषणाभ्यास एव परमं साधनम्, अभ्यासे च संस्कृतानभिज्ञानां श्रोतृणां व्यवहारपात्राणां काठिन्यस्य च संकोचः क्रमशः आश्रयणीयः । कामं प्रष्टव्यो बोद्धव्यो वा उत्तरं हिन्दीभाषया मातृभाषया वा ब्रवीतु परं स्वीयम् अभिप्रेतं श्रमेण अनेकवाक्यैः विविधपर्यायाद्यावर्तनेन वा सुरगिरैव श्रोतृहृदि कथमप्यवतारयेत् संस्कृतवक्ता । एतादृशोऽभ्यासः समेषामभीप्सितः श्रमसाध्यश्चेति न ममाभ्यासस्य प्रार्थनाऽस्थाने । तथा च प्रार्थनायाः सफलतायै श्रीकाशीविश्वनाथमभ्यर्थ्य विरमति विदुषामनुकम्पनीयः केदारनाथओझाः ।

पारिजातम्

अधुना अहं समेषां संस्कृतसाहित्यवरेण्यानां विदुषां पुरस्तात् 'पारिजातम्' मासिकं सुरभारतीयपत्रविशेषस्य वैशिष्ट्यं विवृणोमि । वर्षद्वयं व्यतिक्रान्तं यत् पारिजातपत्रमेतत् संस्कृतजनानां चेतांसि रञ्जयति । मनोरमणीयं सुरुच्यमस्योपरिआवरणम् । पारिजातकुसुममिव सुगन्धिं प्रयच्छति सततम् साम्प्रतं पूरतो मे एकदाशं पुष्पं पुष्यति । प्राग् पृष्ठे 'वेदवाणी' इति शीर्षकेण एकस्य मन्त्रस्य व्याख्या क्रियते विशिष्टं डॉ० मुन्शीरामशर्मासोमाभिधेयैः । तदनन्तरं सम्पादकीयं वर्तते खलु । 'हिंस्रः स्वप पेन विहिंसितः खल.''इति सम्पादकमहाभागैः पञ्चावस्थितिमाश्रित्य सुष्ठु प्रदर्शितः । अपरश्च 'जावनं जीवितं रे' श्रीअभिराजो डॉ० राजेन्द्रमिश्रद्वारा विलिखितः साधु प्रतिभाति । एतैः महोदयैः तु प्रायेण निरन्तरमेव पारिजात्पुष्पे लेखाः कवितादय प्रेष्यन्ते । प्रशस्यमित्रमहाभागानामपि रचनाचातुर्यं खलु इह चमत्करोति विपश्चितां चेतांसि । तेषां तु हासकणिका सर्वत्र संस्कृतपत्रिकायां परिहासं करोति एव । किं बहुना, पारिजातेऽस्मिन् पत्रे क्रमेण साहित्यसरणिः, शोधवीथिः हासकणिका, सद्योतः, वातायनं, किशोरकीर्तिः, अजस्रधाराः प्रकाशप्रथमायान्ति । अस्याङ्कस्य लेखकाः ब्रह्मानन्द त्रिपाठी, श्रीमती कमलारत्नम्, रमाशंकरतिवारी, केशवदेवशुक्लः सन्ति । नूनं पत्रमेतत् ग्राहकत्वेन स्वीकरणीयः । स्मेषामेव कृते इदं लाभकरं ज्ञानप्रदञ्च । पठन्तु पारिजातमिति कामयते मन्मनः । अद्यैव पत्रं प्रेषयन्तु पारिजातग्राहकतायै । पारिजात परिमलं जिघ्रन्तु सर्वे । सर्वे प्रभाषन्तां भारतीम् । सर्वान्ते खलु प्रार्थनां करोमि यत् भूतिनाथो भगवान् विश्वनाथः–उद्बुद्धं नवपारिजातकुसुमं पायादपायाच्चिरमिति ।

कृष्णदेवतिवारी, बहालगढ़नगरस्थ ।:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतादनुवर्त्तते—

ब्रह्मचर्यगुणगौरवम्

कृष्णदेवतिवारी बहालगढ़नगरस्थः।

उपदशवर्षवयसि शरीरे वीर्योत्पत्तिः समारब्धा भवति। वीर्यमिदमायुषो षोडशे वर्षे यौवनमारभ्यते, तावत्पर्यन्तं शेषाश्च धातवः समेधन्ते। कालोऽयं मनुष्यजीवने खलु करालः। कुसङ्ग-हेतोः श्रीमान् कामदेवोऽपि अस्मिन्नेव समये प्रचाकटीति। ये बालाः कामवासनायां विषयभोगे वा निपतन्ति ते स्वसर्वस्वं विनाश्य निखिलमायुः प्ररुदन्ति पश्चात्तपन्ति च। निपतति तेषां स्वास्थ्यम्। शीघ्रमेवावर्तयन्ति सर्वे रोगास्तान्, आयुश्च प्रह्रस्यति तेषाम्। भवति अस्मिन्नायुषि वीर्यमान्, इदं विषयभोगेच्छा-पूरणायनैवोत्पद्यते, अपितु प्रभूतेन व्यायामेन बलरूपेण धारयितुं शरीरस्याङ्गभावं च नेतुम्। अस्यां वृध्यवस्थायाम्— "आयुषः षोडश वर्षतः पूर्वं या कन्या पञ्चविंशतिवर्षतश्च पूर्वं यः कुमारो वीर्यादिधातून् विलोपयिष्यति स परशुच्छिन्नेन, पादपेन दण्डो-पहतेन घटेन च समं स्वसर्वस्वं विनाश्य पश्चात्तापं करिष्यति, पुनस्तदधिकारे सुधारो नैव कश्चिद् भविष्यति"। असौ स्वर्गोपमेन युवावस्थादर्शनेनापि वञ्चितो भविष्यति। युवावस्थातः पूर्वमेव स वार्द्धक्यमेस्यति। जीवने वसन्तात् पूर्वमेव शिशिरः समेष्यति। हा! महद् दुःखं यत् समग्रजीवने शुद्धो ब्रह्मचारी भवितुं केवलमेकदा, एकदा, निश्चयत, एकदा एवावसरो लभ्यते, परम् इमे भाग्यहीनाः मुग्धा कुमाराः कुमार्यश्च तमपि परित्यजन्ति। निखिलेऽपि जीवने पुष्कलं क्रन्दन्ते।

अस्माकं युवकानां दयनीयदशा

एको यात्री दूरदेशे प्रयाति व्यापारार्थम्। पथि वर्तते निर्जन-वनम्। पथिकश्चालं चाल श्रान्तः क्लान्तो भवति। विश्रामाय एकस्य पादपस्य सघनच्छायायां शयानो भवति। किञ्चिद् कालान्तरं बुभुक्षापिपासाभ्यां व्याकुल उद्बोधति। स्वपोटलिकां यदा विलोकयति तदा भोज्यं वासांसि च नैवोपलभते। कपयो भोज्य-मुत्थाप्य भुक्तवन्तो वसनं निजं रिक्तमस्ति निपतितम्। चञ्चलै-नलीमुखैर्जलपात्रमपि निपीतं, अवशिष्टं च भूमौ सिक्तम्। जल-पात्रमपि प्रणश्यति निर्जलम्। इदानीं कुटिबद्धं धनाधानं निरी-क्षते तावत्, तदपि नैवोपलभते, तत् परिमार्गणाय इतश्चेतश्च प्रधावति, पुष्कलं कोलाहलं कुरुते रोदिति आक्रन्दते च। ये चौरा लुण्ठका वा तस्य धनमपहृतवन्तस्ते तस्य कोलाहलेन निग्रहभिया तमुपयान्ति, कोलाहलशमाय च दण्डैस्तं प्रहरन्ति पलायन्ते च अरण्ये। असौ पान्थः बुभुक्षितः पिपासितो लुण्ठितो वदनोपह-तश्च भवति। तत्रैव भयावहरजनी च जायते। परितो हिंस्रवन्य-पशूनां घुर्घुरायितं भयङ्करशब्दमालां च शृणोति। स स्वरक्षायाः प्राणधारणस्य चोपायं मार्गं वा न पश्यति। सर्वतो भयस्यातङ्कस्य च साम्राज्यं वीक्षते। यायाच्चेत् क्व यायात्? सत्यमेवैतत्, तद्यात्रितुल्यावस्थाद्य अस्माकं देशस्य युवकानां वर्तते। युवकाः कुसङ्गे निपत्य नष्टा भ्रष्टाश्च भवन्ति, वीर्यस्य मूल्यं कपर्दिकातु-ल्यमपि नावगच्छन्ति। यदा लोचनान्युन्मिषन्ति तदा प्ररुदन्ति पश्चात्तपन्ति च ते युवकाः।

अथ चैकस्य मुग्धजनस्य करे, काचकूपिकैका विलसति। पञ्चशतरूप्यकमूल्यमितं गन्धतैलं तत्र शोभते। कश्चित् तं पप्रच्छ—भवान् अस्य किं करिष्यति? तं प्रत्याह—मलिनायां प्रणालिकायां प्रक्षेपिष्यामि। एवमेव इतरोऽपि कश्चिज्जनोऽस्ति यस्य पार्श्वेऽस्ति महार्घं माणिक्यम्। तं कश्चिद् अवदत् अनेन किं विधास्यति श्रीमान्? सोऽब्रवीत्—इदं सूक्ष्मतरं विष्ट्वा आत्मसात् करिष्यामीति। आभ्यामपि क्वचिदधिकतमस्माकं देशस्य ते युवकाः सन्ति मूर्खाः प्रमत्ताश्च ये स्वं-अमूल्यरत्नं वीर्यम् अहर्निशं निजपाणिभ्यां हस्तमैथुन-पशुमैथुन-गुदामैथुना-दिपापैर्मलिन-प्रणालिकायां प्रवाहयन्ति। यस्य वीर्यस्य एको बिन्दु लक्ष्यरूप्यकतोऽपि मूल्यवान् वर्तते। यदि वीर्यरत्नं समर्ज्य यथाकालं व्ययीक्रियते चेदस्मात् श्रीहनुमद्-भीष्म, शंकराचार्य, गान्धी, दयानन्द, सुभाषसन्निभदेशरत्नानि नूनं जायेरन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदयविदारक दुःखपूर्णा घटना

कुसङ्गपङ्के निमज्यास्माकं कुमाराः केन प्रकारेण जीवनसारं नाशयन्तीति प्रदर्शनायैका सत्यघटनात्र विलिख्यते। तस्य छात्रस्य इह नामल्लेखनं नास्ति श्रेयसे। विद्यालयस्य छात्रेणैकेन निजा करुणाजनिका दुःखपूर्णा सत्या कथा श्राविता भृशं रुदित्वा एवम्।

"यदाहमष्टवर्षदेशीयोऽभवं तदा कुसङ्गपङ्के निपतितः। अन्येऽपि मे सहचारिणः स्वयं कुचेष्टाभिग्रस्ता आसन्। नीचास्ते मामपि तद् गुप्तपापं प्रशिक्षितवन्तः। केनापि कविना साधु इदमुदीरितम "संसर्गजा दोषगुणा भवन्ति"। अहमनेकवर्षपर्यन्तं हस्तमैथुनेन स्वकराभ्यां स्वविनाशं कृतवान्। भगवदनुग्रहेण शारीरसौन्दर्यम् अनुपमं मया प्राप्तम्। ते दुष्टाः कामिनोऽपि सुन्दरस्यैव छात्रस्योपरि एव प्रलोभनं प्रदाय व्यभिचारं गुदामैथुनं, कुर्वन्ति कारयन्ति च। अभ्यवहारेऽपि जिह्वालोलुपोऽहमभवम्। मम कक्षायामनेके विद्यार्थिन आयुषा ज्येष्ठा शरीरेण च बलिष्ठाः परं नीचप्रवृत्तयो आसन्। ते मयि कृत्रिमं स्नेहमुपादर्शयन्। मह्यमनेकानि पणकानि अपि प्रादुः। पण्यवीथिकातो मनोहरराणि वस्तूनि समानीय अभोजयन्। परं यदाहं तेषां कथितं नैवाकुर्वं तदा ते खलाः माम् अभीषयन् अभर्त्सयंश्च। शनैः शनैरेवमोहरज्जुपाशैरहं तैः स्वकरालजाले निबद्धः। तैरनेकवर्षपर्यन्तं साकं मया अतितरां व्यभिचरितम्। तेष्वेव दिवसेषु विद्यालयस्यापि एकः कामी अध्यापको मया सह व्यभिचारम् करणाय एवं स्नेहमातनितुमारब्धवान्। स्नेहस्यास्य निमितं मे कायलावण्यमभवत्। तेनाध्यापकेनापि दुष्टेन न जाने मया सह कतिकृत्वो भृशं व्यभिचारं समाचरितम्। यदाहममीभ्यो दुष्कर्मभ्यो विलग् आसं तदा स्वकक्षायां पठने प्रथमोऽभवम् शरीरं सुन्दरं स्वस्थ चासीत्। अधुना अमीषां दुष्कृतानां फलोपलब्धिः प्रादुर्भूता। निशायां स्वप्नकाले सप्ताहे द्विवीर्यपातोऽजायत। मूत्रेऽपि प्रायेण शुक्रं निःसरति स्म। मस्तिष्कनैर्बल्यमन्वभूयत। अध्ययनेऽपि मे मतिः नालगत्। उत्थानावस्थानकालेन्धत्वमिवाजायत। नानावर्षीयस्वविनाशफलस्वरूपं मे कामद्रुमो नीरसः (वीर्यरहितः) सारशून्यश्चाभवत्। हा! यौवनं निर्गतम्।

'गाण्डीवम्' ग्राहकेभ्य सूचना

संस्कृतानुरागिभ्योऽस्माकं 'गाण्डीवम्,' ग्राहकेभ्यो विनम्रेयमभ्यर्थना यद् साम्प्रतं कर्गदमूल्य–मुद्रणव्ययादिमहर्घताकारणवशात् वयमस्य साप्ताहिकपत्रस्य आगामि २१ टंकारस्य १ शरतः वार्षिक शुल्कं विंशति (२० रू०) रूप्यकाणां स्थाने पञ्चविंशति-(२५ रू०) रूप्यकाणि कर्तुं विवशाः। तदनुसारं हि षाण्मासिकं शुल्कं त्रयोदशः (१३ रू०) रूप्यकाणि, प्रत्यङ्कं शुल्कं च षष्टि (६० न० पै०) पणानि भविष्यन्ति। यैर्महानुभावैः पूर्वतो वार्षिकं षाण्मासिकं वा शुल्कं पूर्वनिर्धारितशुल्कानुसारेण प्रेषितं तेभ्यः कृते प्रतिवर्षानुसारं पञ्चरूप्यकाण्यतिरिक्तत्वेन प्रेषणीयानीति सूचयति—

व्यवस्थापकः

आवश्यकता है

एक प्रधानाचार्य, आदर्शसंस्कृत महाविद्यालय भऊनाथभंजन जिला आजमगढ़ में। योग्यता ज्योतिष में आचार्य के साथ साहित्य या व्याकरण में आचार्य को वरीयता दी जायेगी। विज्ञापन प्रकाशित होने के २१ दिन तक प्रार्थनापत्र स्वीकार किये जायेंगे। मार्गव्यय देय नहीं होगा।

राजदेवमिश्र,
प्रबन्धक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्धारित लक्ष्य की सुनिश्चित प्राप्ति की सुविधाएं बढ़ीं

प्रदेश में आपात स्थलों और रिहायशी मकानों की अत्यधिक कमी है। एक अनुमान के अनुसार वर्ष १९८१ में ही लगभग साढ़े दस लाख मकानों की कमी थी। वर्ष १९८५ तक यह कमी लगभग पन्द्रह लाख तक पहुंच जाने की आशंका है।

आवासों की इस बढ़ती कमी के अनेक कारण हैं। बढ़ती जनसंख्या, नगरों में जरूरत से ज्यादा लोगों का आना, मशीनों की कमी और आवास-निर्माण पर होने वाला भारी खर्च। इन विविध कारणों से ही आवास की समस्या के हल के लिये प्रयास बहु आयामी होना आवश्यक है। कठिनाई दूर करने के लिये अनेक क्षेत्रों में कोशिश की जानी चाहिये और विगत वर्षों में ऐसा ही किया भी गया है। जनसंख्या पर नियन्त्रण के लिये परिवार नियोजन कार्यक्रम, नगरों में लोगों को आने से रोकने के लिये ग्रामीण विकास और ग्रामीण रोजगार के कार्यक्रम आवास कालोनियों के लिये जमीनों का अधिग्रहण और उन पर मकानों का निर्माण इन सबका असर मकानों की कमी दूर करने पर पड़ा है।

वर्ष १९८३--८४ में ६०,००० लोगों को जमीन आवंटित करने का लक्ष्य था जबकि ९६,८९३ लोगों को जमीने आवंटित की गयी। हरिजनों और निर्बल लोगों के लिये १७२९ आवास इकाइयों के निर्माण का लक्ष्य था जब कि २०९३ मकान बन कर तैयार हुये। गंदी बस्तियों में रहने वाले १,७५००० लोगों को पर्यावरण सुधार योजना का लाभ दिया जाना था जब कि लाभान्वितों की संख्या २, १४, ४०५ रही। इस प्रकार इन सभी क्षेत्रों में उपलब्धि शत प्रतिशत से भी अधिक रही।

और अब प्रदेश शासन ने लोगों को सीमेंट तथा अन्य निर्माण सामग्री अधिक सरलता से सुलभ करने, जमीन खरीदने के लिये अधिक सुविधायें देने तथा मकान बनाने के लिये अधिक उदारता पूर्वक ऋणप्रदान करने का निर्णय लिया है।

आवास समस्या के विरुद्ध अभियान को नये उत्साह से चलाया जा रहा है।

सूचना एवं जन संपर्क विभाग, उत्तर प्रदेश द्वारा प्रसारित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिन्दी ने सदैव राष्ट्रीय एकता और पारस्परिक सद्भाव को बढ़ावा दिया है।

हिन्दी इस देश की राष्ट्रभाषा है, सदा से रही है। इसका पूरा साहित्य राष्ट्र प्रेम, सामाजिक, आर्थिक सहिष्णुता और अन्य भाषाओं के प्रति समभाव की भावना से भरा है। इसमें विग्रह की, विद्वेष की, प्रतिस्पर्धा की गुन्जाइश कभी नहीं रही। यही कारण है कि न केवल सम्पूर्ण देश के लोगों ने, विभिन्न वर्गों और सम्प्रदायों के साहित्य सेवियों ने बल्कि विदेशी भाषाओं के जानने वालों ने भी इसकी श्रीवृद्धि का प्रयास किया और इस पुनीत कार्य में सफल रहे। अपनी विकास यात्रा में हिन्दी ने सबका सहयोग प्राप्त किया और सबने इसे अपनाया भी।

उत्तर प्रदेश शासन ने जहां हिन्दी को और अधिक पल्लवित और पुष्पित करने का प्रयास किया है वहीं उर्दू और तमिल, मलयालम जैसी दक्षिण भारत की भाषाओं के उन्नयन के लिए भी प्रभावोत्पादक कदम उठाये हैं। उसने ऐसी भी व्यवस्था की है कि अंग्रेजी के पठन–पाठन में किसी प्रकार की बाधा न आये।

हिन्दी के प्रसार के लिए मुख्यालय पर स्थित हिन्दी संस्थान अपने उद्देश्य के प्रति समर्पित एक विशिष्ट संस्था है जिसे शासन से सहायता प्राप्त है। संस्थान ने हिन्दी भाषा में स्तरीय प्रकाशन कर, विभिन्न हिन्दी विद्वानों की जयन्तियां मनाकर, पुस्तक मेलों, प्रदर्शनियों, कवि सम्मेलनों और व्याख्यानमालाओं के आयोजन कर, हिन्दी प्रेमियों को पुरस्कृत कर तथा उनकी उत्कृष्ट कृतियों को क्रय कर राष्ट्रभाषा की भरपूर सेवा की है और इस दिशा में कार्यरत विभिन्न संस्थाओं में अपना स्थान बना लिया है।

प्रदेश शासन की नीति भाषा के क्षेत्र में भी सहअस्तित्व की है।

सूचना एवं जन-सम्पर्क विभाग, उत्तर प्रदेश द्वारा प्रसारित

मुद्रकेण प्रकाशकेन सम्पादकेन च श्रीजगन्नाथोपाध्यायेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्यां कल्पनाप्रेसार्थं सर्वोदयमुद्रणालये वाराणस्यां मुद्रापयित्वा प्रकाशितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu